मीमांसान्यायप्रकाशोक्तदिशा

# विशिष्टविधिनिरूपणम्

- डॉ. पवनव्यासः

मीमांसादर्शनस्य प्रयोजनं धर्मस्य निरूपणम् ।

स च धर्मः वेदप्रतिपाद्यः प्रयोजनवदर्थो यागादिरेव ।

धर्मे वेदस्य सर्वोच्चप्रामाण्यम् ।

मीमांसकानां मते सर्वो वेदः प्रयोजनवदर्थपर्यवसायीति ।

स च वेदः पञ्चविधः । तद्यथा -

# वेदःपञ्चधा



तत्र **विधिः प्रयोजनवदर्थविधानेन अर्थवान् । स चाप्राप्तमर्थं विधत्ते ।**

मीमांसान्यायप्रकाशोक्तलक्षणेऽस्मिन् विधेः वैशिष्ट्यद्वयमवगम्यते –

१. वेदभागो विधिः सर्वदा प्रयोजनवद् अर्थं विधत्ते । इत्युक्ते निष्प्रयोजने (फलरहिते) कर्मणि विधिः कमपि न नियोजयति ।

२. सः विधिः सर्वदा प्रमाणान्तरेण अज्ञातम् अर्थं बोधयति ।

## लक्षणसङ्गतिः -

यथा - **अग्निहोत्रं जुहुयात् स्वर्गकामः**

इति विधिवाक्यं प्रयोजनवद् स्वर्गफलकं होमं विधत्ते ।

स च स्वर्गसाधनभूतः होमः प्रमाणान्तरेण अप्राप्त एव ।

स च विधिः मीमांसान्यायप्रकाशकारेण विधेयदृशा त्रिविधः वर्णितः । तद्यथा –

विधिः

प्रधानविधिः

अग्निहोत्रं जुहुयात् स्वर्गकामः ।

गुणविधिः

दध्ना जुहोति ।

विशिष्टविधिः

सोमेन यजेत ।

# *विशिष्टविधिनिरूपणम्*

यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते । तदुक्तम् –

'न चेदन्येन शिष्टाः'[१] इति । शिष्टा उपदिष्टा इत्यर्थः ।

यथा - 'सोमेन यजेत'

इत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयाग-विधानम् – **सोमवता यागेन इष्टं भावयेत्** इति ।

न चोभयविधाने वाक्यभेदः, विशिष्टस्यैकत्वात् ।

१. 'तद्गुणास्तु विधीयेरन् अविभागाद्विधानार्थे न चेदन्येन शिष्टाः'

(-जैमिनिसूत्रम्, १/४/९)

- मीमांसान्यायप्रकाशे

यथा **‘अग्निहोत्रं जुहोति’** इत्यत्र कर्मणः होमस्य विधानं यथा च **‘दध्ना जुहोति’** इत्यत्र गुणस्य दधिद्रव्यस्य विधानं पृथक् पृथग् वाक्येन कृतम्, तथा **‘सोमेन यजेत’** इत्यत्र कर्मणः गुणस्य च प्रापकम् अन्यत् किमपि वाक्यं नोपलभ्यते अतः अत्र गुणविशिष्टकर्मणः विधानं **‘सोमेन यजेत’** इत्येकेन एव वाक्येन स्वीक्रियते । अत्र सोमस्य यागार्थत्वात् तस्य साधनत्वम् । अतः शाब्दबोधे सोमस्य विशेषणत्वेन यागस्य च विशेष्यत्वेन प्रयोगः –

**सोमवता यागेन इष्टं भावयेत्** इति ।

# मत्त्वर्थलक्षणानिरूपणम्

- विशिष्टविधौ च मत्त्वर्थलक्षणा ।
- सोमपदेन मत्त्वर्थो लक्ष्यते ।
- न हि मत्त्वर्थलक्षणां विना सोमस्य अन्वयः सम्भवति ।


मत्वर्थलक्षणां विना अन्वयः द्विविधः
सामानाधिकरण्येन
सोमेन यागेन इष्टं भावयेत्
वैयधिकरण्येन
यागेन सोमं भावयेत्
सोमेन यागं भावयेत्

# सामानाधिकरण्येन

## सोमेन यागेन इष्टं भावयेत् ।

- उभयविधाने वाक्यभेदः ।
- सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापातः ।
- सोमस्य यागार्थत्वानुपपत्तिः ।
- यागे द्रव्यानुपपत्तिः।
- प्रत्ययवाच्यफलभावनायाः समानपदोपात्तेन यागेन करणाकाङ्क्षानिवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेन अन्वयानुपपत्तिः ।

# वैयधिकरण्येन अन्वयः द्विधा

**यागेन सोमं भावयेत् ।**

1. समानपदोपात्तत्वात् प्रत्ययवाच्यफलभावनायां करणत्वेन अन्वितस्य यागस्य सोमकर्मक-भावनान्वयानुपपत्तिः ।
2. यागस्य सोमार्थत्वापातः ।

**सोमेन यागं भावयेत् ।**

भावनाकरणत्वेन अन्वितस्य यागस्य साध्यत्वेन अन्वयानुपपत्तिः ।


एषः सङ्ग्रहः
मत्वर्थलक्षणां विना अन्वयः द्विविधः
सामानाधिकरण्येन
सोमेन यागेन इष्टं भावयेत्
पञ्च दोषाः
1. उभयविधाने वाक्यभेदः ।
2. सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापातः ।
3. सोमस्य यागार्थत्वानुपपत्तिः ।
4. यागे द्रव्यानुपपत्तिः।
5. प्रत्ययवाच्यफलभावनायाः समानपदोपात्तेन यागेन करणाकाङ्क्षानिवृत्तत्वेन भिन्नपदोपात्तस्य सोमस्य करणत्वेन अन्वयानुपपत्तिः ।
वैयधिकरण्येन
यागेन सोमं भावयेत् ।
दोषद्वयम्
1. समानपदोपात्तत्वात् प्रत्ययवाच्यफलभावनायां करणत्वेन अन्वितस्य यागस्य सोमकर्मक-भावनान्वयानुपपत्तिः ।
2. यागस्य सोमार्थत्वापातः ।
सोमेन यागं भावयेत् ।
एकः दोषः
1. भावनाकरणत्वेन अन्वितस्य यागस्य साध्यत्वेन अन्वयानुपपत्तिः ।